# ॥ વૈષ્ણવગીતા ॥

## .. vaiShNavagItA ..

sanskritdocuments.org

September 11, 2017

# .. vaiShNavagItA ..

# ॥ વૈષ્ણવગીતા ॥

## Sanskrit Document Information

Text title : vaiShNavagItA

File name : vaiShNavagItA.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : May 18, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

અમ્બરીષ ઉવાચ –
કેનોપાયેન દેવર્ષે ભવબન્ધાદ્વિમુચ્યતે ।
તદ્વદસ્વ મહાભાગ યદ્યસ્તિ મય્યનુગ્રહઃ ॥ ૧॥

નારદ ઉવાચ –
સાધુ પૃષ્ટં મહાભાગ સર્વધર્મભૃતાં વર ।
વક્ષ્યામિ તવ રાજેન્દ્ર શૃણુષ્વાવહિતો મમ ॥ ૨॥

કૈવલ્યદાયિની ગીતા શ્રીવૈષ્ણવગીતાભિધા ।
શૃણુષ્વ પરયા ભક્ત્યા ભવબન્ધવિમુક્તયે ॥ ૩॥

વૈષ્ણવાનાં ગતિર્યત્ર પાદસ્પર્શશ્ચ યત્ર વૈ ।
તત્ર સર્વાણિ તીર્થાનિ તિષ્ઠન્તિ નૃપસત્તમ ॥ ૪॥

આલાપં ગાત્રસંસ્પર્શં પાદાભિવન્દનં તથા ।
વાઞ્છન્તિ સર્વતીર્થાનિ વૈષ્ણવાનાં સદૈવ હિ ॥ ૫॥

વિષ્ણુમન્ત્રોપાસકાનાં શુદ્ધં પાદોદકં શુભમ્ ।
પુનાતિ સર્વતીર્થાનિ વસુધામપિ ભૂપતે ॥ ૬॥

નિપીડિતોઽહં શ્રાન્તોઽહમ્ દાઘસંસારવર્ત્મનિ ।
યેન ભૂયો ન ગચ્છામિ તત્ કુરુષ્વ શ્રીવૈષ્ણવ ॥ ૭॥

દીનં ચ ભક્તિહીનં ચ આધિવ્યાધિનિપીડિતમ્ ।
અનાશ્રયમનાથં ચ ત્રાહિ માં કૃપયા પ્રભો ॥ ૮॥

ગતિર્નાસ્તિ ગતિર્નાસ્તિ સત્યં શ્રીવૈષ્ણવં વિના ।
તત્પાદરજસા પૂતં ત્રૈલોક્યં સચરાચરમ્ ॥ ૯॥

કથિતં તવ રાજેન્દ્ર રહસ્યં પરમાદ્ભુતમ્ ।
અભક્તાય ન દાતવ્યં દત્તે તુ નારકા ભવેત્ ॥ ૧૦॥

ઇતિ શ્રીવૈષ્ણવગીતા સમાપ્તા ॥

Encoded and proofread by PSA Easwaran psaeaswaran at gmail.com

.. vaiShNavagItA ..

Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996

on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*